


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2022; 8(1): 411-414
www.allresearchjournal.com
Received: 12-11-2021
Accepted: 16-12-2021

**अरूण कुमार**
घोषपुर, कोदण्डा, भाया-शाकुण्ड
बॉका, बिहार, भारत

**Corresponding Author:**
**अरूण कुमार**
घोषपुर, कोदण्डा, भाया-शाकुण्ड
बॉका, बिहार, भारत

# पाटलिपुत्रराजसभापरीक्षितविदुषां विवरणात्मकं निरूपणम्

**अरूण कुमार**

**सारांश**
पाटलिपत्रराजसभापरीक्षित विदषां कतीनां समीक्षाक्रमे प्राप्यते यत् बहुकाले पाटलिपुत्रस्य प्राचीना सारस्वतपरम्परा प्रावर्तत इति राजशेखरः स्वकाव्यमीमासानामके कविशिक्षाप्रमुखे ग्रन्थे सादरं स्मरति। यथा– अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः। वररूचिपतंजली इह परीक्षिताः ख्यातिमुपजग्मुः।। अर्थात् पाटलिपुत्रस्य राजसभायां पाणिनि, पिंगलः, व्याडिः, वररूचि एवंच पतंजली विद्यन्ते। सर्वे तत्र शास्त्रार्थ क्रियन्ते।

**कूटशब्द** : पाटलिपत्रराजसभापरीक्षित विदषां, पतंजली, कविशिक्षाप्रमुखे

**प्रस्तावना**

अधुना पाटलिपुत्रस्य राजसभायां उपरोक्त विदुषां परिचयः संक्षिप्तरूपेण क्रमशः प्रस्तूयते–

1. **पाणिनिः** संस्कृतव्याकरणशास्त्रेतिहासाऽऽलोडने कृते ऐन्द्रचान्द्रकाशकृत्स्नाऽऽ–पिशादिप्रामुख्यम्भजमानेषु व्याकरणेषु रत्नायमानं सांगोपागं पाणिनीयमेव व्याकरणं समुपलभ्यते। संस्कृतवांमयस्याऽनुपमरत्नस्वरूपमिदं व्याकरणमित्यत्र नाऽस्ति सन्देहेलेशोऽपि। व्याकरणेषु सम्पूर्णस्य शब्दजातस्य व्युत्पत्तिसामर्थ्यमनवलोक्य महामुनिः पाणिनिलौकिकन्दसोभयविध–प्रयोगसाधनार्थं महेश्वरप्रसादलबीजसा "अष्टाध्यायी" गन्र्थं प्रणिना। गन्थोऽयं गीर्वाणवाण्या प्राचीनेर्ष्वाचीतेषु वाङ्मयेषु सूर्य इव प्रकाशमानो विराजते। अरयाऽत्यन्तं सुन्दरं सुसम्बद्धं सूक्ष्मतमं पदार्थाबद्योतनसामर्थ्यं द्दष्ट्वा प्राच्या पाश्चात्याश्च सर्वे विद्वांसो मुक्तकण्ठेनेनं प्रशंसन्ति।

पाणिनिनाम्नैव पणनं पणः, पणोऽस्याऽस्तीति पणी, पणिनो गोत्रापत्यं पाणिनिरिति व्युत्पत्या पाणिनिर्नामान्वर्थतां भजते। पुरुषोत्तमदेवेन त्रिकाण्डशेषे यथा–

पाणिनिस्त्वाहिकोदासीपुत्रः शालङ्किकपाणिनौ। पाणिनिशब्द–व्युत्पत्तिविषये वैयाकरणेषु मतद्वयमस्ति। प्रथममतानुसारेण "पणिन" शब्दादपत्यथार्थे अणपत्यये "पाणिनि" इति व्युत्पद्यते, पुनश्च तश्मादपत्यार्थे इञ् प्रत्यये "पाणिनि" इति रूपं सिद्धति। यथा–

पणिनोऽपत्यमित्यण पाणिनः।
पाणिनस्याऽपत्यं युवेति इत्र पाणिनिः।।[1]
पाणिनो गोत्रापत्यम् पाणिनिः, तस्याऽपत्यं पाणिनिः।[2]

द्वितीयमतानुसारेण नकारान्तस्य “पणिन” शब्दस्य पर्यायः “पणिन” इति अकारान्तः स्वतन्त्रशब्दोऽस्ति। पस्मात् “अ त इञ्” इति सूत्रेण इञ् प्रत्यये “पाणिनि” शब्दो व्युत्वद्यते। यथा–

पणिनः मुनिः। पाणिनिः पणिनः पुत्र।:[3]

पणिनिना स्वशब्दानुशासने द्विधा बहुवचननान्तस्य “आचार्य” पदस्य निर्देशों विहितः। श्रीहरदत्तमतानुसारेण पाणिनिर्बहुवचनान्तेन “आचार्य” पदेन स्वगोरूल्लखं करोति। यथा–

आचार्यस्य पाणिनेर्य आचार्यः स इहाचार्यः गुरूत्वाद् बहुवचनम्।[4]

कथासरितसागरग्रन्थानुसारेण पाणिनेगुरोनाम “वर्ष” आसीत्। यथा–

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।
तत्रैकः पाणिनि म जडबुद्धितरोऽभवत्।।[5]

श्लोकात्मकपाणिनीय शिक्षानुसारेण पाणिनिना महेश्वरादक्षरसाम्नायस्वरूपचतुदर्श– सूत्राणामुपदेशं लब्ध्वा तदाधारेणैव स्वकीय “अष्टाध्यायी” ग्रन्थो विरचितः। यथा–

येनाऽक्षरसमाम्नाय मधिगप्य महेश्वरात्।
कृतस्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।।[6]

स्कन्दपुराणानुसारेण गोपर्वते तपश्यर्यानन्तरं पाणिनिर्विशिष्टं ज्ञानं लब्धवान्। यथा–

गोपर्वतमिदं स्थानं शम्भोः प्रख्यापितं पुरा।
यत्र पाणिनिना लेभे वैयाकरणिकाग्रताा।।[7]

संस्कृतव्याकरणेतिहासालोडनेन ज्ञायते यत् पाणिनिना अधोलिखिताः ग्रन्थाः प्रणीताः। (1) अष्टाध्यायी (2) शिक्षा चेति।
पाणिनिव्याकरणस्वरूपम्, तद्वैशिष्टयंच पाणिनेरष्टाध्यायी एका एव सर्वांगपूर्णा कृतिरस्ति, यस्या लौकिकवैदिकोभयविधशब्दसिद्धये नियमनिर्देशादयोऽपूर्वाः सर्वसामान्या-श्चाऽभूवन्।

2. **पिङ्गलः** पाटलिपुत्रस्य सभायां छन्दशास्त्रस्य प्रवर्तकः पिंगलः आसीत्। अस्य छन्दसूत्रः उपलब्ध छन्दशास्त्रस्य ग्रन्थेषु सर्वप्राचीनोऽस्ति। अस्य देशकालस्य वास्तविकस्थित अधुनाऽपि अप्राप्तोऽस्ति। एकः परम्परानुसारेण पिंगलः पाणिनि महोदयस्य अनुजः आसीत्। किन्तु अस्य पुष्ट प्रमाणः न प्राप्यते। तथापि पाणिनेरनुजः पिंगलः “उरोबहती यास्कस्य इति सूत्रे यास्कं स्मरति।”[8]
छन्दशास्त्रस्य परम्पायाम् रामानुजाचार्यस्य गुरू (एकादश शताब्दी) आचार्यं यावद् प्रकाशेन पिंगलसूत्रस्य समाप्तोपरि एकः महत्त्वपूर्ण श्लोकस्य वर्णनम् कृतोऽस्ति–

छान्दोज्ञानमिदं भवाद्भगवतो लेभेगुरूणां गुरू।
स्तमाद् दुश्च्यवनस्ततोऽसुरगुरूर्माण्डस्यनामा ततः।।
माण्डप्यादपि सैतवस्तत ऋषिर्यास्कस्ततः पिंगल–
स्तस्येदं यशस गुरोर्भुवि धृतं प्राप्यस्मादद्यः कमात्।।

युधिष्ठिरमीमांसककृतः वैदिकच्छन्दमीमांसा ग्रन्थे बृहस्पतिदुश्चयन (इन्द्र) शुक्राचार्यः, माण्डव्य- सैतव-यास्क-पिंगलस्य नाम्मोलेखो विद्यते। यथा–

छन्दः शास्त्रमिदं पुरा त्रिनयनाल्लेम गुहोऽनादित–
स्तस्मात् प्राप्सनत्कुमारमुनिस्तस्मात् सुराणां गुरुः।
तस्माद्देवपतिस्ततः फणिपतिस्तस्माच्च सरिपंगलस–
तच्छिष्यैर्बहुभिर्महात्मभिरथो मयां प्रतिष्ठापितम्।।

आचार्यस्य छन्दशास्त्रं कठिनोस्ति, तेन कारणेन पिंगलाचार्येन छन्दसूत्रस्य निर्माणः कृतोऽस्ति। पिंगलछन्दशास्त्रे अष्टाध्याया सन्ति। यथा–

छन्दो वक्ष्ये मूलशब्दैः पिंगलोक्तं यथाक्रमम्।।[9]

छन्दशास्त्रे पिंगलस्य एकाधिकारो विद्यते।

3. **व्याडिः** पाटलिपुत्रस्य राजसभायां व्याडिमहोदयस्य उल्लेखोऽपि प्राप्यते। आचार्यव्याडेर्नामनिर्देशकः पाणिनेरष्टाध्यायां नोपलभ्यते, किन्तु शौनकेन ऋक्प्रातिशाख्ये व्याडेरनेका मतान्युदधृत्तानि सन्ति।[10] भाषावृत्तौ[11] पुरूषोत्तमदेवेन गालवेन साकं व्याडेरेक मतमुद्धतमस्ति। यथा–

इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्।[12]

पतंजलि महाभाष्येऽपि एकं प्रमाणं प्राप्यते। यथा–

आपिशलपाणिनीव्याडीयगौतमाः।[13]

ऋकपाप्रातिशाख्ये शाकल्यगार्याभ्यां साकमेव व्याडिरप्युल्लेखो विद्यते। यथा–

व्याडिशाकल्यगााः।[14]

एतेनेदं सिध्यति यद् व्याडिना किंचित् शब्दानुशासनं नूनं रचितम्। व्याडेद्वितीयं नाम दाक्षायणः। अयं दाक्षीपुत्रस्य पाणिनेरस्ति मातुलः। अनेन लक्षश्लोकात्मकः संग्रहनामको ग्रन्थो लिखित आसीदिति प्रसिद्धिः। तस्य संग्रहग्रन्थस्य लक्षणमेवास्ति–

विस्तरेणोपदिष्टा नामर्थानां सूत्रभाष्ययोः।
निबन्धोः यः समासेन संग्रहं तं विदुर्बुधाः।।[15]

समुद्रगुप्तेन कृष्णचरिते मुनिकविवर्णनप्रसंगेलिखितमस्ति यद् व्याडिः रसाचार्यः, श्रेष्ठमीमांसकः कविश्चासीत्–

रसाचार्यः कविर्व्याडिशब्दबहमैकवाङ्मुनिः। :
दाक्षिपुत्रवचो व्याख्या पटुर्मीमांसकागुणीः।।
बालचरितं कृत्वा यो जिगाय भारतं व्यासं च।
महाकाव्यविनिर्माणे तागस्य प्रदीपमिह।।

अतः उपरोक्त वर्णनेन ज्ञायते यत् पाटलिपुत्रस्य राजसभायां व्याडि सदृशः व्याकरणस्य मर्मज्ञाय उपस्थिति वर्तते।

**4. वररूचिः** पाटलिपुत्र राजसभायां वररूचिः महोदयस्य उपस्थिति वर्तते। वार्तिककार कात्यायानात् सर्वथा भिन्नेनाऽर्वाचीनेन वररूचिनाऽऽचार्येण अष्टाध्याया एका वृत्तिः प्रणीता। वररूचिरपि कात्यायनगोत्रोत्पन्नः। "सदुक्तिकर्णामृतम्" इत्यभिधेयग्रन्थस्यैकेन श्लोकेन ज्ञायते यदस्याऽपरं नाम "श्रुतिधर" इत्यप्यासीत्। यथा–

ख्यातो यश्च श्रुतिधरतया विक्रमादित्यगोष्ठी।
विद्यामर्तुः खलु वररूचेरासाद प्रतिष्ठाम्।।[16]

वररूचनिरूक्तसमच्चयात् प्रतीयते यदयं कस्यचिद् राज्ञो धर्माधिकारी आसीत्। यथा युष्मत्प्रसादादहं क्षपितसमस्तकल्मषः सर्वसम्पत् संगतो धर्मानुष्ठा नयोऽयश्च संजातः।[17]
अनेक विद्वांसः वररूचिममं विक्रमादित्यस्य पुरोहितं मन्यन्ते। वररूचेरस्य भागिनयः वासवदत्तालेखकः सुबन्धुरासीत्।[18] वररूचिः महाशयः पाटलिपुत्रस्य शोभा विद्यते। अयं एकः सुप्रसिद्धः वृत्तिकारः विद्यते।

**5. पतंजलिः** पाटलीपुत्र राजभायां पतंजलिः महाशयाः रत्नरूपेण शोभते। महामुनिना भगवता पतंजलिना हि पाणिनीयसूत्राणां याऽप्युत्कृष्टा व्यवहारोपयोगिनी व्याख्या कृता सा संस्कृतजगति "महाभाष्य" नाम्ना व्यपदिश्यते। अत्र व्याकरणस्य शुष्कविषया एवं विधया सरसया सरलया सरण्योपस्थापिताः, यां मुक्तकण्ठं प्रशंसन्ति सर्वे विद्वासः। अस्य रचनासौष्ठवं संस्कृतवाङ्मयेऽपूर्वमस्ति मंजुलम्। वस्तुतो महाभाष्यमतन्न केवलं पाणिनीयव्याकरणेऽति–महत्त्वाधायकमस्ति अपितु समस्ते संस्कृतवाङ्मये इदमकमद्भुतं प्रमाणिकं ग्रन्थरत्नमस्ति। सर्वे वैयाकरण एतस्य समक्षं नतमस्तकाः भविन्त, महाभाष्ये हि प्रायः पाणिनीयसूत्राणां प्रत्येकपदानां विवेचनं कृतं विद्यते। वैयाकरण हि सूत्रवार्तिकभाष्येषु परस्परविरोधे महाभाष्यमेव प्रमाणिकं मन्यन्ते। तथा हि महाभाष्यस्य प्रतीपे कैयटेनोक्तम्– यथोत्तरं हि मुनियत्रयस्य प्रमाण्यम्। प्रतीयोद्योतटीकायांच नागेशेनोक्तम्- यथास्तरं मुनीनां प्रमाण्यम् इति।
महाराजेन समुद्रगुप्तेन प्रणीतस्य कृष्णचरितस्य प्रस्तावनया ज्ञायते यन्महामुनिना पतंजलिना "महानन्दमयं" काव्यं निर्मितमासीत्। तथाहि–

विद्ययोद्रिक्तगुणतया भूमावमरतां गताः।
पतंजलिर्मुनिवरो नमस्यो विदुषां सदा।।
कृतं येन व्याकरणभाष्यं वचनशोधनम्।
धर्मावियुक्ताश्चरक्रे योगाः रोगमुषः कृताः।
महानन्दमयं काव्यं योगदर्शनमद्भुतम्।।

अतएवोक्तं भर्तृहरिणा वाक्यपदीपे–

कृतेऽथ पतंजलिना गुरूणा तीर्थदर्शिना।
सर्वषां न्यायबीजानां महाभाष्ये निबन्धने।।

अतः पाटलिपत्रस्य राज्यसभायां पाणिनि: पिंगल: व्याडि वररूचि एवं च पतंजलि: पंचविदुषां विद्यन्ते। यस्य ख्यातिः अद्वितीयो विद्यन्ते।

**संदर्भाः**

1. कैयट महाभाष्यप्रदीप -1/1 आ० 9/ सू० 73।
2. बालमनोरमा भाग-1 पृ० 392।
3. काशकृत्स्नधातु व्याख्यानम् -1/206 एवंच 1/480।
4. हरदत -पदमंजरी भाग -2 पृ० 821।
5. कथासरितसागर लम्बक -1/तरंग-4/श्लोक -20।
6. श्लोकात्मकपाणिनीय शिक्षायाम्।
7. स्कन्दपुराण, उत्तरार्धम् -2/68।
8. पिंगलछन्दशास्त्रम् -3/30।
9. पिंगलछन्दशास्त्रम्- 328/1।
10. शौनक -ऋक्प्रातिशाख्यम् -2, 23, 28, 6, 43, 13, 31, 37।
11. शौनक -ऋक्प्रातिशाख्यम् -6/1/70।
12. पुरुषोत्तमदेव भाषावृत्तिः -6/1/70।
13. पतंजलि महाभाष्यम् -6/2/36।
14. शौन -ऋक्प्रातिशाख्यम्-13/31।
15. भरतमुनि नाट्यशास्त्रम् -6/9।
16. सदुक्तिकर्णामृतम् पृ०- 297।
17. सदुक्तिकर्णामृतम् पृ०- 51।
18. भगवदत्त भारतवर्षस्य इतिहासः०पृ --9।